**दिनाङ्क :- 04.09.2025**

**प्रात: - 06:55**

**<u>सीतारामन्-जी. एस्. टी. परिष्काराः</u>**

सामान्यजन- श्रमप्रधान-उद्योग- कृषक- कृषि- स्वास्थ्यादीनि च अर्थव्यवस्थायाः प्रमुखानि चालकानि लक्ष्यीकृत्य जी. एस. टी. परिषदा कराधानस्य तर्कसङ्गतीकरणं स्वीकृत्य परिष्काराः विनिर्दिष्टाः। वित्तमन्त्री निर्मला सीतारामनः गत रात्रौ नवदेहल्यां वार्ताहरैस्सह सँल्लपन्ती उक्तवती यत् सामान्यजनेन सह मध्यमवर्गीयजनसमूहाधारितानां वस्तूनां वस्तु-सेवा-करः अष्टादश प्रतिशतात् द्वादश प्रतिशतं, द्वादश प्रतिशताच्च पञ्च प्रतिशतं यावत् न्यूनीकृतमस्तीति। सा सूचितवती यत् एतानि सर्वाणि परिवर्तनानि अस्य मासस्य द्वाविंशतिः दिनाङ्कात्, नवरात्र्याः प्रथमदिवसाच्च प्रवर्तन्ते। श्रीमती सीतारामन् इत्येषा अकथयत् यत् निर्णयस्यास्य उद्देश्यं जनसामान्याय सुलभता दानेन सह देशस्योपरि आश्वस्तिभावनायाः वर्धापनाय च अस्तीति।

**<u>बाइट-निरमाला-बीमा</u>**

वित्तमन्त्रिणा इतोऽपि घोषणा कृता यत् त्रयस्त्रिंशत् जीवनरक्षक-औषधयः द्वादश प्रतिशतात्मकाः भविष्यन्तीति

**<u>बाइट-निर्मला ऑन बेनिफिट</u>**

वित्तमन्त्रिणा सूचितं यत् केशतैलं, प्रासाधनिक-फेनकादीनि दैनन्दिन-जीवनोपयोगीनि वस्तून्यपि केवलं पञ्च- प्रतिशतात्मिकश्रेण्यां भविष्यन्तीति। सा इतोऽपि अकथयत् यत् कतिपय दुग्धाधारित-वस्तूनि पञ्चतः शून्यश्रेण्याम् आगमिष्यन्तीति।

**<u>पीएम जी. एस. टी.:</u>**

प्रधानमन्त्रिणा नरेन्द्रमोदिना वित्तमन्त्रिणा निर्मला सीतारामनेन घोषितेषु जी. एस्. टी. इत्यस्य नेक्स्ट-जनरेशन्-रिफार्म्स् इत्येतस्य प्रशंसा कृता। सामाजिक-प्रसार-माध्यमे श्रीमोदी अवदत् यत् सर्वकारेण जी. एस्. टी. इत्यस्य मूल्यानां न्यूनीकरणस्य निर्णयः कृतः, येन सामान्यजनाः, कृषकाः, लघुमध्यमोद्योगिनः, मध्यमवर्गाः, महिलाः, युवकाश्च उपकृताः भविष्यन्तीति।

**<u>मुरुगन जी. एस. टी.:</u>**

सूचना-प्रसारण-राज्यमन्त्री डा. एल्. मुरुगनः अवदत् यत् एकोनाशीतितमे स्वातन्त्र्यदिवसे प्रधानमन्त्रिणा नरेन्द्रमोदिना परिष्कारमुद्दिश्य यः स्वरः निर्धारितः आसीत् तदनु दीपावलीति पर्वणः प्राक् जनेभ्यः उत्सवोपहारलाभं दातुं जी एस टी परिष्कारात्मकनिर्णयः निर्णीतः। सामाजिक-प्रसार-माध्यमे डा. मुरुगनः अवदत् यत् जी. एस्. टी.-तरिष्कारः न केवलं मूल्यानां तर्कसङ्गतीकरणमेव अस्ति अपितु संरचनात्मक-परिष्काराणां, जीवनस्य सुगमतायाः विषयेष्वपि अस्ति, येन व्यवसायिनः एकीभूय अतीव सुगमतया कार्यं कर्तुं शक्नुवन्तीति।

**छत्तीसगढ-MAOISTS SURRENDERED:**

छत्तीसगढ-राज्ये सुकमा-मण्डले त्रयस्त्रिंशत् लक्षरूप्यकाणां पुरस्कारस्य घोषणायुताः नवमहिलाभिः सह विंशतिः माओवादिनः शरणागताः अभवन्। एते माओवादिनः ह्यः सुक्मा-नगरस्य आरक्षक-अधीक्षकस्य कार्यालये शरणागताः अभवन्। आरक्षकाधिकारिणी किरण-चव्हाणः अवदत् यत् शरणागताः माओवादिनः हिंसायाः अनेकेषु घटनासु संलग्नाः आसन्नीति।

**पन्जाब-शिवराजसिंह चौहानः**

केन्द्रीयकृषि-कृषक-कल्याण-मन्त्री शिवराजराजसिंह-चौहानः अद्य जलाप्लावनेन पीडितस्य पञ्जाबराज्यस्य निरीक्षणाय पञ्जाबराज्यं गच्छति। केन्द्रीयमन्त्री अमृतसर गुरुदास्पुर्, कपुर्तला इत्यादिषु सर्वाधिकप्रभावितानां जनपदानां कतिपयानां ग्रामाणाञ्च भ्रमणं करिष्यति। सः एतेषु मण्डलेषु प्रभावितान् जनान् अपि मिलिष्यति।

**सिङ्गापुर-प्रधानमन्त्री-भारतागमनम्**

प्रधानमन्त्री नरेन्द्रमोदी अद्य नवदेहल्यां सिङ्गापुर्-देशस्य समकक्षीयेण लारेन्स् वोङ्ग् इत्यनेन सह द्वैपाक्षिकं मेलनं करिष्यति। विदेशमन्त्रालयः अवदत् यत् श्री वोङ्ग्-वर्यस्य यात्रा भारत-सिङ्गापुर्-राजनैतिक-सम्बन्धस्य षष्टिवर्षपूर्तौ समायोजितोऽस्तीति।

**केरला-साबरी मालाः**

केरल-राज्ये अद्यात् रविवासपर्यन्तं सबरीमला-पर्वत-तीर्थे ओणमिति पूजा भविष्यति। ओणम्-उत्सवस्य कृते ह्यः सायङ्काले मन्दिरं उद्घाटितम् आसीत्, रविवासरे सायङ्काले पुनश्च निरुद्धं भविष्यति।

**ऐ एम् डी ऋतुः**

भारतीय-ऋतु-विभागेन अद्य गुजरात्-राज्ये केषुचित् स्थानेषु अत्यधिकवृष्ट्या सह अति-वृष्टेरपि पूर्वानुमानं कृतमस्ति। अनेन विभागेन राजस्थानस्य, महाराष्ट्रस्य, मध्यप्रदेशस्य, कोङ्कणस्य, गोवाराज्यस्य च केषुचित् भागेषु प्रचण्डतोऽधिक- वर्षायाः पूर्वानुमानं कृतमस्ति।

**एशिया कपः**

एशिया-कप्-हाकी-च्याम्पियन्शिप्-क्रीडायां भारत-कोरिया-देशयोः मध्ये द्वितीय-सूपर्-फोर इति-श्रेण्याः क्रीडा ह्यः बिहारस्य राजगीर्-स्पोर्ट्स्-काम्प्लेक्स्-क्रीडाङ्गणे द्वि द्वि अङ्कैः समाङ्केन समाप्ता।